विड़ङ्गन्त्वधिकं दद्याद्रक्तिद्वयं पुनः। द्वादशाहं योग-
वृद्धिस्ततो ह्रासक्रमोऽप्ययम्। यकृत्प्लीमम्लपित्तञ्च क्षयं
शूलञ्च सर्वदा। ताम्रयोगो जयत्येष बलवर्णाग्निवर्द्धनः"।

**ताम्रसायनी** स्त्री ताम्ररसस्य रक्तनिर्यासस्यायनी। गो-
रक्षदुग्धायां जटाधरः।

**ताम्रलिप्त** पु॰ देशभेदे। सोऽभिजनोऽस्य तस्य राजा वा अण्।
तद्देशवासिनि तन्नृपे च बहुषु अणो लुक्। स च देशः
प्राचीस्थः। "ताम्रलिप्तञ्च राजानं कर्वटाधि-
पतिं तथा" भा॰ स॰ २९ अ॰। भीमप्राचीदिग्विजये।
"वङ्गाः कलिङ्गा मगधास्ताम्रलिप्ताः सपुण्ड्रकाः" भा॰
स॰५१अ॰। स्वार्थे क। तत्रार्थे "किराताः कर्वराः सिद्धाः
वैदेहास्ताम्रलिप्तकाः" भा॰भी॰ ९ अ॰। जनपदोक्तौ।

**ताम्रवर्ण** पु॰ ताम्रो रक्तो वर्णोऽस्य। १पञ्जिवाट्टवृक्षे वृक्षभेदे
राजनि॰। २जटायां स्त्री शब्दच॰। ३ताम्रवर्णयुतमात्रे
त्रि॰। कर्म्म॰। ४रक्ते वर्णे पु॰।

**ताम्रवल्ली** स्त्री कर्म्म॰। १मञ्जिष्ठायाम् शब्दच॰ २चित्र
कूटदेशप्रसिद्धे लताभेदे राजनि॰। ३रक्तलतामात्रे च।

**ताम्रवीज** पु॰ताम्रं वीजं यस्य। १कुलत्थे राजनि॰। २रक्त-
वीजके वृक्षमात्रे त्रि॰। कर्म॰। ३रक्ते वीजे न॰। ४कुलत्थि-
कायां स्त्री शब्दार्थचि॰। [५रक्तवर्णके वृक्षे पु॰।

**ताम्रवृक्ष** पु॰ कर्म्म॰। १रक्तचन्दनवृक्षे २कुलत्थे च रत्नमा॰

**ताम्रवृन्त** पु॰ ताम्रं वृन्तमस्य। १कुलत्थे, स्त्रीत्वमपि टाप्
त्रिका॰। २रक्तवृन्तके वृक्षमात्रे त्रि॰। कर्म्म॰। ३रक्ते
वृन्ते न॰।

**ताम्रशिखिन्** पु॰ ताम्रा रक्ता शिखास्त्यस्य इनि। कुक्कुटे
जटाधरः। ब॰ व॰। ताम्रशिख इत्यपि तत्र। ताम्र-
शिखायुक्ते च त्रि॰।

**ताम्रसार** न॰ ताम्रं रक्तं सारमस्य। १रक्तचन्दनवृक्षे।
रत्नमाला। २रक्तसारके वृक्षमात्रे त्रि॰। कर्म्म॰। ३रक्ते
सारे पुंन॰।

**ताम्रसारक** पु॰ ताम्रो रक्तः सारोऽस्य कप्। १खदिरे
राजनि॰। २रक्तचन्दनवृक्षे च। ३तत्काष्ठे न॰ शब्दार्थचि॰।

**ताम्रसारिक** पु॰ ताम्रः सारोऽस्त्यस्य ठन्। १रक्तखदिरे,
२रक्तचन्दने च शब्दार्थचि॰।

**ताम्रा** स्त्री ताम्र+टाप्। १सैंहिल्यां २ताम्रवक्त्रां शब्दमा॰।

**ताम्राख्य** पु॰ उपद्वीपभेदे शब्दमाला। ताम्रद्वीपे।

**ताम्राक्ष** पुंस्त्री ताम्रे अक्षिणी यस्य षच् समा॰। १कोकिले
त्रिका॰ स्त्रियां षित्त्वात् जातित्वाच्च ङीष्। २रक्तलक्ष-

युक्ते त्रि॰ स्त्रियां षित्त्वात् ङीष्। "विशाला यत्र ताम्राक्षैः
पूर्णचन्द्रनिभाननैः। वर्षभूः कीर्त्त्यते" भा॰ क॰ ४६ अ॰।

**ताम्राभ** न॰ ताम्रस्य आभेवाभा यस्य। १रक्तचन्दने शब्दच॰।
ताम्रा रक्ता आभा यस्य। २रक्तवर्णाभायुक्ते त्रि॰ "रुधि-
रोक्षितसर्वाङ्गैस्तैस्तदायोधनं बभौ। कबन्धैः संवृतं सर्वं
ताम्राभैः खमिवावृतम्" भा॰ द्रो॰ ११९ अ॰।

**ताम्रारुण** न॰ तीर्थभेदे "ताम्रारुणं समासाद्य ब्रह्मचारी
समाहितः। अश्वमेधमवाप्नोति ब्रह्मलोकञ्च गच्छति"
भा॰ व॰ ८४ अ॰।

**ताम्रार्द्ध** पु॰ ताम्रस्यार्द्धोंऽशभेद इत्यादेर्कोऽस्य। कांस्ये त्रिका॰

**ताम्रावती** स्त्री ताम्रमाधेयत्वेनाऽस्त्यस्य मतुप् मस्य वः
संज्ञायां दीर्घः। ताम्राकरे नदीभेदे "ताम्रावती वेत्रवती
नद्यस्त्रिस्रोऽथ कौशिकी" भा॰ व॰ २२१ अ॰।

**ताम्राश्मन्** पु॰ नि॰ कर्म्म॰। पद्मरागे "ताम्राश्मरश्मिच्छुरितै-
र्नखाग्रैः" माघः। "ताम्राश्मनां पद्मरागाणाम्" मल्लिना॰।

**ताम्रिक** त्रि॰ ताम्रं तत्पात्रादिनिर्माणं शिल्पमस्य ताम्रस्येदं
वा ठञ्। १कांस्यकारे २सङ्कीर्णजातिभेदे पुंस्त्री॰ स्त्रियां
ङीष्। ३ताम्रसम्बन्धिनि त्रि॰। "कार्षिके ताम्रिके पणः"
अमरः। "कार्षापणस्तु विज्ञेयस्ताम्रिकः कार्षिकः पणः"
मनुः। "निष्काः सुवर्णाश्चत्वारः कार्षिकस्ताम्रिकः पणः"
मात्स॰। ४गुञ्जायां स्त्री टाप् राजनि॰। ५वाद्यभेदे शब्दार॰

**ताम्री** स्त्री ताम्रस्य विकारः अण् ङीप्। वाद्यभेदे त्रिका॰।

**ताय** पालने विस्तारे च भ्वा॰ आत्म॰ सक॰ सेट्। तायते
अतायि-अतायिष्ट। तताये। ऋदित्। णिच् अतता-
यत्-त। तायितः तातिः "उभौ मायां व्यातायेताम्"
भट्टिः। "सरसि संतायमाने" यजु॰ ३९।५। घञ्। तायः
वृषा॰ आद्युदात्तः। ल्युट्—तायनम् "वृत्तिसर्गतायनेषु
क्रमः" पा॰।

**तायिक** त्रि॰ताये इष्टौ साधु ठञ्। तज्जिकाभिधदेशे हेमच॰

**तायु** पु॰ ताय—उण्। चौरे स्तेने निघण्टुः "अपत्ये
तायवो यथा नक्षत्रा" ऋ॰ १।५०।२।

**तार** पु॰ तारयति स्वजापकान् संसारार्णवात् तॄ—णिच्—अच्
तार्य्यतेऽनेन वा तॄ—णिच् करणे अच्, तॄ—णिच्—भावे अच्
वा। १प्रणवे ओङ्कारे "तारयेद् यद्भवाम्भोधेः स्वजापकं-
मानसम्। ततस्तार इति ख्यातो यस्तं ब्रह्मा व्यलोकयत्"
काशीख॰ ७३ अ॰। २वानरभेदे ३शुद्धमौक्तिके ४सुक्ता
विशुद्धौ मेदि॰ ५देवीप्रणवे कूर्चवीजे (ह्रीँ) तन्त्रसा॰
६तारणे विश्वः ७महादेवे "काश्यां विश्वेश्वरोऽहं गिरि-